Shri Ganeshagitam

श्रीगणेशगीतम्

Document Information

Text title : Shri Ganeshagitam

File name : gaNeshagItam.itx

Category : ganesha, gItam

Location : doc_ganesha

Author : Subrahmanyayogi

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 1, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2026

sanskritdocuments.org

श्रीगणेशगीतम्

(सुब्रह्मण्ययोगिकृतम्)
क्व प्रासूत कदा त्वां गौरी न प्रामाण्यं तव जनने ।
विप्राः प्राहुरजं गणराजं यः प्राचामपि पूर्वतमः ॥ १॥

नासि गणपते शङ्करात्मजो भासि तद्वदेवाखिलात्मकः ।
ईशता तवानीशता नृणां केशवेरिता साशयोक्तिभिः ॥ २॥

गजमुख तावकमन्त्र महिम्ना सृजति जगद्विधिरनुकल्पम् ।
भजति हरिस्त्वां तदवनकृत्ये यजति हरोऽपि विरामविधौ ॥ ३॥

सुखयति शतमखमुखसुरनिकरानखिलक्रतु विघ्नघ्नोऽयम् ।
निखिलजगज्जीवनदः स खलु यतः पर्जन्यात्मा ॥ ४॥

प्रारम्भे कार्याणां हेरम्बं यो ध्यायेत् ।
पारं यात्येव कृतेराराद्याप्नोति सुखम् ॥ ५॥

गौरीसुनोः पादाम्भोजे लीना चेतोवृत्तिर्मे ।
घोरे संसाररण्ये वासः कैलासे वास्तु ॥ ६॥

गुहगुरु पदयुगमनिशमभयदम् ।
वहसि मनसि यदि शमयसि दुरितम् ॥ ७॥

जय जय शङ्करवरसूनो भयहर भजतां गणराज ।
नय मम चेतस्तव चरणं नियमय धर्मेऽन्तः करणम् ॥ ८॥

चलसि चित्त किन्नु विषमविषयकानने
कलय वृत्तिममृत दातृकरिवरानने ।
तुलय खेदमोदयुगलमिदमशाश्वतं
विलय भयमलङ्घ्यमेव जन्मनि स्मृतम् ॥ ९॥

सोमशेखरसूनवे सिन्दूरसोदरभानवे

यामिनीपतिमौलये यमिहृदयविरचितकेलये ।
मूषकाधिपगामिने मुख्यात्मनेऽन्तर्यामिने
मङ्गलं विघ्नद्विषे मत्तेभवक्त्रज्योतिषे ॥ १०॥

अवधीरितदाडिमसुम सौभगमवतु गणेशज्योतिर्मामवतु गणेशज्योतिः ।
हस्तचतुष्टय धृतवरदाभयपुस्तकबीजापूरं धृतपुस्तकबीजापूरम् ॥ ११॥

रजताचल वप्रक्रीडोत्सुकगजराजास्यमुदारं भज श्रीगजराजास्यमुदारम् ।
फणिपरिकृत कटिवलयाभरणं कृणु रे
जनहृदि कारणं तव कृणु रे जनहृदि कारणम् ॥ १२॥

यः प्रगे गजराजमनुदिनमप्रमेयमनुस्मरेत् ।
स प्रयाति पवित्रताङ्गो विप्रगङ्गाद्यधिकताम् ॥ १३॥

सुब्रह्मण्यमनीषिविरचिता त्वब्रह्मण्यमपाकुरुते ।
गणपतिगीता गानसमुचिता सम्यक्पठतां सिद्धान्तः ॥ १४॥

इति सुब्रह्मण्ययोगिकृतं श्रीगणेशगीतं सम्पूर्णम् ।

Proofread by Narendran Madathil

Shri Ganeshagitam

pdf was typeset on October 1, 2026

Please send corrections to *sanskrit@cheerful.com*